ISBN 978-81-88220-22-1
रू. १५.००
ISBN 8188220221

• डा. विश्वासः

पञ्चतन्त्रकथाः

संस्कृतभारती
बेङ्गलूरु

पञ्चतन्त्रकथाः

निरूपकः -

डा० विश्वासः

संस्कृतभारती

बेङ्गलूरु

प्रकाशनम् -
संस्कृतभारती
'अक्षरम्', ८ उपमार्गः, २ घट्टः
गिरिनगरम्, बेङ्गलूरु - ५६० ०८५

१ - ८ मुद्रणम् - ४०,०००
नवमं मुद्रणम् - २०११ - ५०००
दशमं मुद्रणम् - २०१३ - ५०००
एकादशं मुद्रणम् - २०१४ - ५०००

मूल्यं - **रू. १५.००**

मुद्रणम् -
वागर्थ
न. रा. कालोनी, बेङ्गलूरु - १९

ISBN 978- 81-88220-22-1

PANCHATANTRA KATHAH - A collection of stories from Panchatantra in simple Samskrit, re-nerrated by Dr. VISHWASA. Publisher - **SAMSKRITA BHARATI** - 'Aksharam', 8th Cross, II Phase, Girinagar, Bangalore - 560 085.

Pages - iv + 52 Price - Rs. 15-00 Eleventh Print - March - 2014, Printed at - Vagartha, N.R. Colony, Bangalore - 560 019

प्रास्ताविकम्

(प्रथमं मुद्रणम्)

जगत्प्रसिद्धाः पञ्चतन्त्रकथाः के वा न जानन्ति ? विष्णुशर्मणा संस्कृतभाषया लिखिताः एताः कथाः जगतः सर्वाधिकभाषाभिः अनूदिताः सन्ति ।

पञ्चतन्त्रस्य भाषा अत्यन्तं व्यावहारिकी सरला च । तथापि संस्कृतस्य प्राथमिक-अभ्यासिनां दृष्ट्या तत्र तत्र सा भाषा अपि कठिनायते । अतः तादृशान् अभ्यासिनः मनसि निधाय अत्र अत्यन्तं सरलया भाषया पञ्चतन्त्रस्य काश्चन कथाः पुनः निरूपिताः सन्ति । एताः कथाः प्राथमिकाभ्यासिनां साहाय्यम् आचरन्ति इति वयं विश्वसिमः ।

कर्णाटकस्य प्रसिद्धसाप्ताहिक्यां विक्रमपत्रिकायां 'सुगन्ध' शीर्षके एताः कथाः प्रथमं प्रकाशिताः । पत्रिकायाः सम्पादकस्य श्री बे.सु.ना.मल्यमहोदयस्य स्नेहपूर्वकः अनुरोधः एव एतासां कथानां पुनर्निरूपणे कारणम् । अतः कथानां प्रथमप्रकाशकं श्री बे.सु.ना.मल्यमहोदयं कृतज्ञतापूर्वकं स्मरामः ।

श्रीमती नन्दादेवी कथायाः उचितानि चित्राणि लिखित्वा पुस्तकस्य सौन्दर्यं वर्धितवती अस्ति । तां वयं कृतज्ञतापूर्वकं स्मरामः । मुद्रणकार्ये सहकृतवद्भ्यः मुद्रणालयबन्धुभ्यः अन्येभ्यः सहकारिभ्यः च वयं कृतज्ञतां समर्पयामः ।

श्रीमुख सं।। निजभाद्रपदपूर्णिमा
३०.९.१९९३

- प्रकाशकः

(एकादशं मुद्रणम्)

पुस्तकस्य एतस्य जनप्रियता अपूर्वा । अतः एव एतत् एकादशं मुद्रणं प्रवर्तमानम् अस्ति । एतस्य कारणीभूतेभ्यः सर्वेभ्यः सहकारिभ्यः वयं कृतज्ञतां समर्पयामः ।

विजय सं।। फाल्गुनकृष्णचतुर्थी
२०.०३.२०१४

- प्रकाशकः

कथासूची

१. काकस्य उपायः

कश्चन महावृक्षः आसीत् । तत्र कश्चन काकः पत्न्या सह वसति स्म । तस्य एव वृक्षस्य कोटरे कश्चन कृष्णसर्पः अपि वसति स्म । यदा काकी प्रसूता भवति तदा कृष्णसर्पः तस्याः शावकान् खादति स्म । एतेन काकः काकी च महत् दुःखम् अनुभवतः स्म ।

अतः एकदा काकः स्वमित्रस्य श्रृगालस्य समीपं गत्वा उक्तवान् – ''भोः मित्र ! सः कृष्णसर्पः कथञ्चित् मारणीयः । भवान् कमपि उपायं सूचयतु'' इति । श्रृगालः एकम् उपायं सूचितवान् । तत् श्रुत्वा काकः बहु सन्तुष्टः ।

तदनन्तरं काकः उड्डयनं कुर्वन् नगरम् आगतवान् । तत्र महाराजस्य प्रासादस्य सरोवरे अन्तःपुरस्त्रियः जलक्रीडायां मग्नाः आसन् । तासां वस्त्राणि आभरणानि च सरोवरस्य सोपानेषु स्थापितानि आसन् । काकः तत्र गतवान् । एकं सुवर्णहारं स्वीकृत्य अरण्याभिमुखं प्रस्थितवान् । तत् दृष्ट्वा राजभटाः काकम् अनुसृतवन्तः ।

काकः अरण्यम् आगत्य महावृक्षस्य कोटरे तं हारं पातितवान्, स्वयं दूरं गतवान् च । राजभटाः तत्र आगतवन्तः । कोटरे ते हारं दृष्टवन्तः । तदा तत्र स्थितः कृष्णसर्पः कोपेन बहिः आगतवान् । राजभटाः दण्डप्रहारेण तं मारितवन्तः । हारं च नीतवन्तः ।

तदनन्तरं काकः पत्न्या सह सुखेन जीवितवान् ।

OO

२. वञ्चकः बकः

कुत्रचित् अरण्यप्रदेशे एकः सरोवरः आसीत् । तत्र बहवः जलचराः आसन् । कश्चन बकः अपि तत्र बहुकालतः वसति स्म । कालान्तरे सः बकः वृद्धः अभवत् । वार्धक्यकारणतः सः मत्स्यान् ग्रहीतुम् अपि असमर्थः अभवत् । 'इदानीं कथम् आहारः सम्पादनीयः ?' इति चिन्तयन् सः एकम् उपायम् अन्विष्टवान् । सरोवरस्य तीरे स्थित्वा अश्रूणि मुञ्चन् सः रोदनम् आरब्धवान् ।

तदा कश्चन कर्कटकः तस्य समीपम् आगत्य पृष्टवान् – ''माम ! किमर्थं भवान् रोदनं करोति ?'' इति ।

तदा बकः उक्तवान् – ''अद्य दैवज्ञमुखतः अहम् एकां दुर्वार्तां श्रुतवान् – 'इतः परं द्वादशवर्षपर्यन्तम् अत्र अनावृष्टिः भविष्यति' इति । अस्माकं सरोवरे किञ्चिदेव जलम् अस्ति । शीघ्रमेव तदपि शुष्कं भविष्यति । तदा मम बान्धवाः भवन्तः सर्वे अपि मृताः भविष्यन्ति किल इति मम अतीव दुःखम्'' इति ।

तत् श्रुत्वा कर्कटकः तां वार्ताम् अन्यजलचरान् निवेदितवान् । ते सर्वे अपि भीताः सन्तः बकस्य समीपम् आगतवन्तः । विनयेन तं पृष्टवन्तः – ''माम ! अस्माकं प्राणरक्षणार्थं कोऽपि उपायः अस्ति किम् ?'' इति ।

तदा बकः उक्तवान् – ''इतः किञ्चिद्दूरे अन्यः कश्चन सरोवरः

अस्ति । तत्र प्रभूतं जलम् अस्ति । तत् कदापि शुष्कं न भविष्यति । यदि भवन्तः मम पृष्ठम् आरोहन्ति तर्हि अहं भवतः सर्वान् तत्र नयामि'' इति ।

तदा ते जलचराः महता उत्साहेन तं परितः स्थितवन्तः । बकः तान् पृष्ठे आरोप्य ततः प्रस्थितवान् । किञ्चिद्दूरे एका शिला आसीत् । तत्र तान् स्थापयित्वा सः सन्तोषेण खादितवान् । एवमेव सः बहून् जलचरान् खादितवान् ।

एकस्मिन् दिने कर्कटकः उक्तवान् - ''माम ! अद्य मां नयतु'' इति ।

'अस्तु, अद्य कर्कटकस्य मांसं खादामि' इति चिन्तयित्वा बकः तं पृष्ठे आरोपितवान्, वध्यशिलां प्रति गतवान् च ।

कर्कटकः दूरादेव शिलायां पतितानि अस्थीनि दृष्ट्वा बकस्य दुरालोचनां ज्ञातवान् । अतः सः स्वदन्तद्वयेन बकस्य कण्ठं दृढं गृहीतवान् ।

वेदनया रोदनं कुर्वन् सः वञ्चकः बकः मृतः ।

OO

३. नष्टः पिष्टघटः

कस्मिंश्चित् नगरे कश्चन दरिद्रः ब्राह्मणः वसति स्म । सः भिक्षाटनेन जीवनं करोति स्म । कदाचित् सः पिष्टेन पूर्णम् एकं घटं प्राप्तवान् । तं घटं नागदन्ते अवलम्ब्य तस्य अधः उपविश्य सः एकदृष्ट्या घटमेव पश्यति स्म ।

एकदा रात्रौ सः चिन्तितवान् – 'यदि देशे दुर्भिक्षः भवेत् तर्हि एतस्य शतरूप्यकाणां मूल्यं भवेत् । तदा अहम् एतत् विक्रीय तेन धनेन अजद्वयं क्रेष्यामि । कालान्तरे तेन अजसमूहः एव भविष्यति । अनन्तरम् अजसमूहं विक्रीय धेनूः क्रेष्यामि । अनन्तरं ताः विक्रीय महिषीः, ताः विक्रीय अश्वान् च क्रेष्यामि । तान् अपि विक्रीय यथेष्टं धनं सम्पादयिष्यामि । बृहत् गृहं निर्मापयिष्यामि । तदा कश्चित् ब्राह्मणः आगत्य रूपवतीं स्वकन्यां मह्यं दास्यति । अनन्तरं मम पुत्रः जनिष्यते । देवशर्मा इति तस्य नामकरणं करिष्यामि । यदा सः जानुभ्यां चलितुं समर्थः भविष्यति तदा अहम् अश्वशालायां पुस्तकं पठिष्यामि । तदा देवशर्मा जानुभ्यां चलन् मम समीपम् आगन्तुम् उद्युक्तः भविष्यति । तदा तं बालं ग्रहीतुं तस्य मातरम् आज्ञापयिष्यामि । यदा सा मम वचनं न श्रोष्यति तदा अहं कोपेन पादप्रहारेण तां दण्डयिष्यामि' इति ।

एवं चिन्तयन् सः पादप्रहारं कृतवान् एव । पिष्टेन पूर्णः घटः पतितः, भग्नः च ।

अनागतवतीं चिन्ताम् असम्भाव्यां करोति यः ।
स एव पाण्डुरः शेते देवशर्मपिता यथा ।।

४. उपायेन शक्यं सर्वम्

कस्मिंश्चित् अरण्ये भासुरकः नाम सिंहः वसति स्म । सः अतीव शक्तिशाली । भासुरकः प्रतिदिनम् अनेकान् मृगान् विना कारणं मारयति स्म । एतेन वनस्य अन्ये मृगाः कष्टम् अनुभवन्ति स्म ।

अतः एकदा ते मृगाः सम्भूय गत्वा भासुरकं प्रार्थितवन्तः – "स्वामिन् ! विना कारणम् एवं मृगाणां मारणेन भवतः कः लाभः ? एकस्य एव मृगस्य खादनेन भवतः उदरं पूर्णं भवति किल ? अतः अद्य आरभ्य भवतः आहारार्थं प्रतिदिनम् एकं मृगं वयमेव प्रेषयिष्यामः । भवान् तं मृगं खादतु । अन्यान् मृगान् न पीडयतु" इति ।

तदा भासुरकः उक्तवान् – "तथैव अस्तु । परन्तु यस्मिन् दिने मम समीपं मृगः न आगमिष्यति, तस्मिन् दिने सर्वान् अपि मृगान् मारयिष्यामि एव" इति ।

मृगाः तत् अङ्गीकृतवन्तः । ततः आरभ्य प्रतिदिनं जातिक्रमेण एकः मृगः भासुरकस्य आहारत्वेन गच्छति स्म । भासुरकः तं खादति स्म । अन्ये मृगाः निर्भयम् अरण्ये सञ्चरन्ति स्म ।

कदाचित् जातिक्रमेण केनचित् शशकेन भासुरकस्य आहाररूपेण गन्तव्यम् आपतितम् । सः शशकः दुःखेन सिंहसमीपं प्रस्थितवान् । मार्गे एकः कूपः आसीत् । कूपस्य उपरि गमनसमये शशकः

स्वस्य प्रतिबिम्बं तत्र दृष्टवान् । तदा तस्य मनसि कश्चन उपायः स्फुरितः । 'अहं भासुरकम् एतस्मिन् कूपे पातयिष्यामि' इति चिन्तयन् सः विलम्बेन भासुरकस्य समीपं गतवान् ।

'अद्य मृगः समये न आगतः' इति भासुरकः अतीव कुपितः आसीत् । तदा शशकः मन्दं मन्दं गत्वा प्रणम्य तस्य पुरतः स्थितवान् । तं तर्जयन् भासुरकः उक्तवान् - ''रे शशकाधम ! समये आगन्तव्यम् इति परिज्ञानं नास्ति वा भवतः ? भवान् विलम्बं कृतवान् किल ? अतः प्रथमं भवन्तं खादित्वा अनन्तरं सर्वं मृगकुलमेव नाशयिष्यामि'' इति ।

तदा शशकः विनयेन उक्तवान् - ''स्वामिन् ! मया अपराधः न कृतः । भवतः समीपं समये आगन्तव्यम् इत्येव अहं प्रस्थितः । परन्तु मार्गे अन्यः एकः सिंहः आसीत् । सः मां दृष्ट्वा पृष्टवान् - 'भवान् कुत्र गच्छति ?' इति । 'भासुरकस्य आहारार्थं गच्छामि' इति अहम् उक्तवान् । तदा सः उक्तवान् - 'एतत् मम अरण्यम् । अत्र सर्वे अपि मृगाः मम आज्ञां पालयेयुः । भासुरकः कुत्र अस्ति ? सः चोरसिंहः स्यात् । भवान् तम् अत्र आनयतु । आवयोः मध्ये युद्धं भवतु । युद्धे यः जयति सः एव भवन्तं खादतु' इति । तस्य सूचनानुसारम् अहम् अत्र आगतवान् । अतः एव विलम्बः जातः'' इति ।

''एवम् !! तर्हि तं सिंहम् इदानीम् एव मारयामि । सः कुत्र अस्ति ? प्रदर्शयतु'' इति भासुरकः उक्तवान् । शशकः तं कूपसमीपं नीतवान्, कूपं प्रदर्शितवान् च ।

भासुरकः तत्र जले स्वस्य प्रतिबिम्बं दृष्टवान् । क्रोधेन गर्जनं कृतवान् । कूपतः इतोऽपि उच्चैः प्रतिध्वनिः आगतः । भासुरकः तं प्रतिबिम्बमेव स्वस्य प्रतिस्पर्धिनं मत्वा तं मारयितुं तस्य उपरि आक्रमणं कृतवान् ।

कूपमध्ये पतितः सः जले निमग्नः मृतः च ।

५. नष्टा मन्दविसर्पिणी

कश्चन महाराजः आसीत् । तस्य शय्यायां मन्दविसर्पिणी नाम यूका वसति स्म । सा यूका महाराजस्य रक्तम् आस्वादयन्ती सुखेन जीवति स्म ।

एकदा अग्निमुखः नाम कश्चित् मत्कुणः तां शय्याम् आगतवान् । तं दृष्ट्वा मन्दविसर्पिणी उक्तवती – ''भोः मत्कुण ! भवान् किमर्थम् अत्र आगतवान् ? भवता अत्र न स्थातव्यम् । शीघ्रमेव इतः गच्छतु'' इति ।

तदा अग्निमुखः उक्तवान् – ''आर्ये ! अहं बहुजनानां रक्तम् अस्वादितवान् । परन्तु कुत्रापि मधुरं रक्तं न लब्धम् । भवती अनुमतिं ददाति चेत् एतस्य महाराजस्य मधुरं रक्तं पीत्वा मम जीवनं सार्थकं करोमि'' इति ।

मन्दविसर्पिणी उक्तवती – ''भोः अग्निमुख ! अहम् अनुमतिं ददामि । परन्तु महाराजः यदा निद्रावशः भवति, तदा अहं प्रथमं तस्य रक्तं पिबामि । तदनन्तरम् एव भवता रक्तं पातव्यम् । त्वरा न करणीया'' इति ।

''अस्तु, अहं तथैव करोमि'' इति अग्निमुखः अङ्गीकृतवान् ।

किञ्चित्कालानन्तरं महाराजः तत्र आगतवान्, शय्यायां सुप्तवान् च । महाराजस्य इतोऽपि निद्रा न आगता आसीत् । तदानीमेव जिह्वाचापलं निरोद्धम् असमर्थः अग्निमुखः तं दष्टवान् । महाराजः

झटिति शय्यातः उत्थितवान् । सेवकान् आज्ञापितवान् – ''भोः सेवकाः ! शय्यायां किम् अस्ति इति भवन्तः शीघ्रमेव पश्यन्तु'' इति ।

सर्वे अपि सेवकाः सर्वाणि शय्यावस्त्राणि परिशीलितवन्तः । अत्रान्तरे मत्कुणः मञ्चस्य रन्ध्रं प्रविष्टवान् । सेवकाः वस्त्रमध्ये स्थितां मन्दविसर्पिणीं दृष्टवन्तः, मारितवन्तः च ।

एवं दुष्टाय मत्कुणाय आश्रयस्य दानेन मन्दविसर्पिणी स्वयं नष्टा । अतः प्राज्ञैः उच्यते – दुष्टेभ्यः आश्रयः न दातव्यः इति ।

६. नीलभाण्डे पतितः शृगालः

कस्मिंश्चित् वने चण्डरवः नाम शृगालः वसति स्म । एकदा सः आहारम् अन्विष्यन् नगरम् आगतवान् । तं दृष्ट्वा अनेके शुनकाः भषन्तः समीपम् आगतवन्तः । चण्डरवः भीत्या धावितुम् उद्युक्तः । शुनकाः अपि तस्य अनुसरणं कृतवन्तः । चण्डरवः प्राणभयात् धावन् मार्गे दृष्टं रजकगृहं प्रविष्टवान् ।

तत्र नीलरसेन परिपूर्णम् एकं महाभाण्डम् आसीत् । चण्डरवः तस्मिन् भाण्डे पतितवान् । यदा सः भाण्डतः बहिः आगतः तदा तस्य शरीरं समग्रं नीलवर्णमयम् आसीत् । 'एषः एव सः शृगालः' इति अजानन्तः शुनकाः अन्यत्र कुत्रापि गतवन्तः । चण्डरवः इतस्ततः अटन् कथञ्चित् वनम् आगतवान् ।

तत्र अन्ये मृगाः एतं नीलवर्णयुतं शृगालं दृष्ट्वा भीताः पलायनं कुर्वन्ति स्म । तदा चण्डरवः तान् उक्तवान् – ''भोः प्राणिनः ! भीतिः मास्तु । भवतां सर्वेषां रक्षणार्थम् एव चतुर्मुखः ब्रह्मा मां प्रेषितवान् अस्ति । अतः इतः परम् अहमेव भवतां राजा । मम आज्ञा भवद्भिः पालनीया'' इति ।

सिंहः, गजः, व्याघ्रः इत्यादयः सर्वे अपि मृगाः तत् अङ्गीकृतवन्तः । एवं चण्डरवः तस्य वनस्य राजा अभवत् ।

प्रतिदिनं सिंहादयः मृगान् मारयित्वा मांसम् आनीय चण्डरवस्य पुरतः स्थापयन्ति । चण्डरवः आनन्देन तत् खादति । एवमेव सः विनायासं सुखेन जीवति स्म ।

एकदा चण्डरवः सभायाम् उपविष्टवान् आसीत् । अन्ये प्राणिनः अपि पार्श्वे आसन् । तदा अकस्मात् दूरप्रदेशतः शृगालसमूहस्य कोलाहलः श्रुतः । स्वबान्धवानां ध्वनेः श्रवणात् चण्डरवस्य महान् आनन्दः जातः । तस्य शरीरं पुलकितम् अभवत् । सः उत्थाय आनन्दातिरेकेण नेत्रे निमील्य तारस्वरेण विरौतुम् आरब्धवान् । तदा सिंहादयः प्राणिनः 'एषः सामान्यः शृगालः एव, न तु ब्रह्मणा प्रेषितः' इति ज्ञातवन्तः । अतः एकेन एव प्रहारेण ते तं मारितवन्तः ।

७. त्रयः धूर्ताः

कस्मिंश्चित् ग्रामे मित्रशर्मा नाम ब्राह्मणः आसीत् । सः अतीव निर्धनः । कदाचित् सः ग्रामान्तरं गतवान् । तत्रत्यः भूस्वामी अतीव दयालुः आसीत् । सः ब्राह्मणाय दानरूपेण एकम् उत्तमम् अजं दत्तवान् । ब्राह्मणः तम् अजं स्वग्रामम् आनेतुम् उद्युक्तः । परन्तु अजः मार्गे इतस्ततः धावितुम् आरब्धवान् । अतः ब्राह्मणः तम् अजं स्कन्धे निधाय ग्रामाभिमुखं प्रस्थितः ।

तेन एव मार्गेण त्रयः धूर्ताः आगच्छन्ति स्म । ते ब्राह्मणम् अजं च दृष्ट्वा परस्परं चिन्तितवन्तः - 'कथञ्चित् एतं ब्राह्मणं वञ्चयित्वा अजम् अपहराम' इति । अनन्तरं तेषु एकः वेषपरिवर्तनं कृत्वा ब्राह्मणस्य पुरतः आगत्य उक्तवान् - ''भोः ब्राह्मणोत्तम ! किम् एतत् अकार्यं करोति भवान् ? शुनकं वहति किल ? एतादृशं लोकविरुद्धं कार्यं न करणीयम् । जनाः यदि पश्यन्ति तर्हि हसन्ति'' इति ।

ब्राह्मणः कोपेन उक्तवान् - ''किं भवान् अन्धः ? अजं शुनकः इति वदति किल भवान् ?'' इति ।

''कोपं न करोतु श्रीमन् ! भवान् यथा इच्छति तथैव करोतु । भवतः स्कन्धे स्थितः तु शुनकः एव, न तु अजः'' इति उक्त्वा सः धूर्तः गतवान् ।

किञ्चित्कालानन्तरं द्वितीयः धूर्तः आगतवान् । सः ब्राह्मणं

दृष्ट्वा आश्चर्यम् अभिनयन् पृष्टवान् - ''किं भोः ब्राह्मणोत्तम ! मृतं वत्सं स्कन्धे वहति किल ? एतत् शास्त्रविरुद्धं न वा ? किमर्थं भवान् एवं करोति ?'' इति ।

इदानीं ब्राह्मणस्य मनसि संशयः उत्पन्नः । तथापि सः उक्तवान् - ''किं भोः ! भवान् अपि अन्धः वा ? अजं मृतवत्सः इति वदति किल !'' इति ।

धूर्तः - ''क्षम्यताम् । अहं वस्तुस्थितिम् उक्तवान् । भवान् यथा इच्छति तथा करोतु'' इति उक्त्वा ततः गतवान् ।

पुनः तृतीयः धूर्तः आगतवान् । सः पृष्टवान् - ''भोः ब्राह्मण ! किम् एतत् अकार्यं करोति भवान् ? गर्दभं स्कन्धे वहति किल ? भवतः बुद्धिः नास्ति किम् ?'' इति ।

तदा ब्राह्मणः चिन्तितवान् - 'मम स्कन्धे अन्यः प्राणी एव अस्ति इति भाति । एकः शुनकः इति वदति । अन्यः मृतवत्सः इति वदति । एषः गर्दभः इति वदति । अथवा एषः प्राणी मायावी स्यात् । अतः विभिन्नरूपेण दृश्यते । अतः एषः मया न नेतव्यः' इति ।

एवं चिन्तयित्वा सः अजं परित्यज्य धावितवान् । ते त्रयः अपि धूर्ताः अजं गृहीत्वा मारयित्वा यथेष्टं खादितवन्तः ।

८. कर्कटकस्य उपायः

कस्मिंश्चित् वने कश्चन वटवृक्षः आसीत् । तस्मिन् वृक्षे बहवः बकाः वासं कुर्वन्ति स्म । वृक्षस्य कोटरे एकः कृष्णसर्पः अपि वासं करोति स्म ।

एकदा कृष्णसर्पः एकस्य बकस्य शावकान् खादितवान् । तदा

सः बकः अत्यन्तं दुःखितः अभवत् । सः एकस्य सरोवरस्य तीरम् आगत्य नेत्राभ्याम् अश्रूणि मुञ्चन् स्थितवान् । तदा एकः कर्कटकः तं पृष्टवान् - ''माम ! किमर्थं भवान् रोदनं करोति ?'' इति ।

तदा बकः उक्तवान् - ''कृष्णसर्पः मम शावकान् खादितवान् । अतः अहं दुःखितः अस्मि । तस्य दुष्टसर्पस्य मारणार्थं भवान् एकम् उपायं वदतु'' इति ।

तदा कर्कटकः चिन्तितवान् - 'वस्तुतः एषः बकः अस्माकं जातिवैरी । अतः अहं कृष्णसर्पं मारयितुं तादृशम् उपायं वदामि, येन बकस्य अपि मरणं भवेत्' इति ।

अनन्तरं सः उक्तवान् - ''माम ! भवान् एतस्य नकुलस्य बिलद्वारतः कृष्णसर्पस्य कोटरपर्यन्तम् अपि मत्स्यखण्डान् प्रक्षिपतु । नकुलः तेन एव मार्गेण आगत्य कृष्णसर्पं मारयिष्यति'' इति ।

बकः तथैव कृतवान् । नकुलः मत्स्यखण्डान् खादन् अग्रे अग्रे आगत्य कृष्णसर्पस्य कोटरं दृष्टवान् । कृष्णसर्पं मारितवान् । अनन्तरं शनैः शनैः तस्मिन् वृक्षे स्थितान् सर्वान् बकान् अपि मारितवान् ।

९. व्यर्थः मूर्खोपदेशः

कश्चन तमालवृक्षः आसीत् । तस्य वृक्षस्य शाखायाम् एकः नीडः आसीत् । तत्र कश्चन चटकः पत्न्या सह वसति स्म । कदाचित् वर्षाकालः आगतः । बहिः सर्वत्र शीतलं वातावरणम् आसीत् । नीडे तु औष्ण्यम् आसीत् । अतः चटकः निरातङ्कः आसीत् ।

तदा कश्चन वानरः तत्र आगतवान् । वृष्ट्या तस्य शरीरं क्लिन्नम् आसीत् । शैत्येन सः कम्पते स्म । सः वानरः दन्तवीणां वादयन् वृक्षम् आरुह्य उपविष्टवान् ।

तं दृष्ट्वा चटका उक्तवती – ''किं भोः ! भवतः हस्तपादसहितं सुदृढं शरीरम् अस्ति । तथापि एकं गृहं निर्माय तत्र वासं कर्तुं भवान् किं न शक्नोति ? किमर्थम् एवं शीतपीडाम् अनुभवति भवान् ?'' इति ।

तत् श्रुत्वा वानरः उक्तवान् – ''रे, अधमे ! किमर्थं मौनेन न तिष्ठति भवती ? मम विषये भवती किमर्थं चिन्तयति ?'' इति ।

परन्तु चटका मौनेन न स्थितवती । पुनः तथैव उपदेशम् आरब्धवती । तदा वानरस्य महान् कोपः आगतः । सः तां शाखाम् आरुह्य चटकायाः नीडं शतधा खण्डशः कृतवान् । एवं मूर्खम् उद्दिश्य उपदेशेन चटकायाः नीडः एव नष्टः अभवत् ।

१०. बलवान् कः ?

पुरातनकाले गङ्गातीरे कश्चन आश्रमः आसीत् । तत्र याज्ञवल्क्यः नाम महर्षिः वसति स्म । सः कदाचित् श्येनमुखात् पतिताम् एकां मूषिकां दृष्टवान् । करुणया सः तां मूषिकां आश्रमं नीतवान् । तत्र मन्त्रबलेन तां कन्यकां कृतवान् । याज्ञवल्क्यस्य अपत्यानि न आसन् । अतः तां कन्यकां स्वपुत्रीम् इव पालितवान् सः ।

कालान्तरे सा कन्यका विवाहयोग्या जाता । याज्ञवल्क्यः सूर्येण सह तस्याः विवाहं कारयितुम् इष्टवान् । अतः सः पुत्रीं पृष्टवान् – ''भवती किं सूर्यं परिणेष्यति ?'' इति ।

तदा सा उक्तवती – ''अहं सूर्यस्य तापं सोढुं न शक्नोमि । अतः इतोऽपि उत्तमम् अन्यं वरं भवान् सूचयतु'' इति ।

ऋषिः सूर्यम् एव पृष्टवान् – ''भगवन् ! भवतः अपेक्षया उत्तमः वरः कः ?'' इति ।

सूर्यः उक्तवान् – ''मेघः माम् आच्छाद्य तिष्ठति । सः मम अपेक्षया बलवान्, योग्यः चापि'' इति ।

ऋषिः मेघम् आहूतवान् । पुनः पुत्रीं पृष्टवान् – ''भवती एतं परिणेष्यति किम् ?'' इति ।

सा उक्तवती – ''एतस्य वर्णः कृष्णः । अतः एषः मास्तु । इतोऽपि उत्तमं वरं भवान् सूचयतु'' इति ।

ऋषिः मेघं पृष्टवान् । मेघः उक्तवान् – ''वायुः सहस्रधा मम

विभागं करोति । अतः सः एव मम अपेक्षया बलवान्'' इति ।

ऋषिः वायुम् आहूतवान् । परन्तु पुत्री वायुम् अपि न अङ्गीकृतवती । ''इतोऽपि बलवान् कः अस्ति ?'' इति पृष्टवती ।

''अहं पर्वतं कम्पयितुं न शक्नोमि । अतः पर्वतः एव बलवान्'' इति वायुः उक्तवान् । अनन्तरं ऋषिः पर्वतम् आहूतवान् ।

परन्तु पर्वतः उक्तवान् - ''यद्यपि अहं बलवान्, तथापि मूषिकः मम शरीरे सर्वत्र बिलं करोति । अतः मूषिकः एव मम अपेक्षया बलवान्'' इति ।

ऋषिः मूषिकम् आहूतवान् । पुत्रीं पृष्टवान् - ''भवती एतं परिणेष्यति किम् ?'' इति ।

सा सन्तोषेण अङ्गीकृतवती । अनन्तरं ऋषिः तां मूषिकां कृत्वा मूषकेण सह तस्याः विवाहं कारितवान् ।

११. मूर्खम् उद्दिश्य उपदेशः

कश्चन पर्वतः आसीत् । तत्र बहवः वानराः वसन्ति स्म । कदाचित् हेमन्तसमयः सम्प्राप्तः । सर्वत्र वातावरणे अत्यन्तं शैत्यम् आसीत् । हिमपातः अपि भवति स्म । एतादृशं दुस्सहं शैत्यं सोढुम् अशक्ताः वानराः कम्पन्ते स्म ।

एकदा कश्चित् वानरः कुतश्चित् कानिचित् गुञ्जाफलानि आनीतवान् । तानि गुञ्जाफलानि अग्निकणसदृशानि आसन् । अतः वानराः चिन्तितवन्तः – 'एतान् अग्निकणान् मध्ये स्थापयित्वा, परितः शुष्काणि पर्णानि स्थापयित्वा फूत्कारं कुर्मः

चेत् अग्निः उत्पद्यते । तेन वयं शैत्यपीडां दूरीकर्तुं शक्नुमः' इति । एवं चिन्तयित्वा ते गुञ्जाफलानि मध्ये स्थापयित्वा परितः पर्णानि स्थापितवन्तः । फूत्कारं कर्तुम् आरब्धवन्तः । परन्तु महता प्रयत्नेन अपि अग्निः न उत्पन्नः ।

सूचीमुखः नाम पक्षी एतत् सर्वं पश्यन् आसीत् । वानराणां वृथाप्रयासं दृष्ट्वा सः उक्तवान् – ''भोः मूर्खाः ! एते अग्निकणाः न । अपि तु एतानि गुञ्जाफलानि । भवन्तः किमर्थं व्यर्थश्रमम् अनुभवन्ति ? कुत्रापि गुहायां निर्वातप्रदेशः अस्ति वा इति अन्विष्यन्तु । तत्र गत्वा तिष्ठन्तु'' इति ।

तेषु एकः वृद्धः वानरः आसीत् । सः सूचीमुखम् उक्तवान् – ''अरे मूर्ख ! किं करणीयं, किं न करणीयम् इति वयं सम्यक् जानीमः । भवतः उपदेशः न अपेक्षितः । मौनेन इतः गच्छतु'' इति ।

परन्तु सूचीमुखः तस्य वाक्यम् अनादृत्य पुनः – ''किमर्थं वृथा श्रमम् अनुभवन्ति भवन्तः ?'' इति वक्तुम् आरब्धवान् ।

सूचीमुखस्य उपदेशेन कुपितः कश्चन वानरः तं पक्षयोः गृहीत्वा शिलातले घट्टितवान् । तेन घट्टनेन सूचीमुखः मृतः ।

अतः मूर्खम् उद्दिश्य उपदेशः अस्माकं विनाशाय एव भवति ।

१२. जातिस्वभावः

कस्मिंश्चित् वने कश्चन सिंहः पत्न्या सह वसति स्म । कालान्तरे तस्य पत्नी पुत्रद्वयं प्रसूतवती । सिंहः प्रतिदिनं मृगान् मारयित्वा मांसम् आनीय पत्नीपुत्रेभ्यः ददाति स्म ।

एकदा सिंहः मृगान्वेषणार्थं वने अटति स्म । तत्र सः एकं शृगालशिशुं दृष्टवान् । करुणया तं शिशुम् आनीय सः पत्न्याः हस्ते दत्तवान् । सा अपि तं शिशुं मारयितुम् न इष्टवती । अतः तं वात्सल्येन स्वपुत्रम् इव पालितवती । स्वपुत्राभ्यां यथा आहारादिकं ददाति तथा शृगालशिशवे अपि ददाति स्म सा । अतः ते त्रयः अपि परस्परं भेदं न जानन्ति स्म । एवमेव ते प्रवृद्धाः ।

कदाचित् ते त्रयः अपि वने अटन्ति स्म । तत्र एकः गजः आगतः । गजं दृष्ट्वा सिंहपुत्रौ आक्रमणं कर्तुं सिद्धौ । तदा शृगालपुत्रः - ''भोः, एषः गजः अस्माकं कुलस्य शत्रुः । अतः तस्य पुरतः न गन्तव्यम्'' इति उक्त्वा ततः गृहं प्रति पलायनं कृतवान् । तं दृष्ट्वा निरुत्साहेन सिंहपुत्रौ अपि गृहम् आगतवन्तौ । अनन्तरं तौ - ''भ्राता गजं दृष्ट्वा भीत्या पलायनं कृतवान्'' इति पितरम् उक्तवन्तौ ।

सिंहः तत् श्रुत्वा कुपितः । सः 'भवद्भ्यां सिंहकुलस्य एव अपमाननं कृतम्' इति पुत्रौ निन्दितवान् ।

सिंही शृगालपुत्रम् एकान्ते उक्तवती - ''भोः, पुत्र ! पुनः कदापि भवान् भवतः भ्रात्रोः उत्साहभङ्गं मा करोतु'' इति ।

तदा कुपितः शृगालपुत्रः उक्तवान् - ''अम्ब ! किम् अहम् शौर्येण, रूपेण वा ताभ्यां हीनः ? किमर्थं तौ माम् उपहसतः ?'' इति । सिंही मनसि एव हसित्वा तम् उक्तवती -

''शूरोऽसि कृतविद्योऽसि
दर्शनीयोऽसि पुत्रक ।
यस्मिन् कुले त्वमुत्पन्नो
गजस्तत्र न हन्यते ।।''

भवान् शूरः अस्ति, भवता विद्याभ्यासः अपि कृतः । भवान् सुन्दरः अपि अस्ति । तथापि भवान् वस्तुतः शृगालपुत्रः । अहं करुणया भवन्तं मम पुत्रमिव पालितवती । परन्तु भवतः शृगालकुले जाताः गजं मारयितुं शक्ताः न भवन्ति । भवान् शृगालपुत्रः इति मम पुत्रौ यदि जानीतः तर्हि भवन्तं मारयिष्यतः एव । अतः ततः पूर्वमेव भवान् इतः गत्वा स्वजातीयैः शृगालैः सह वासं करोतु'' इति ।

तत् श्रुत्वा शृगालपुत्रः लज्जया ततः गतवान् ।

१३. पृच्छकः ब्राह्मणः

कस्मिंश्चित् अरण्ये चण्डकर्मा नाम राक्षसः वसति स्म । कदाचित् कश्चित् ब्राह्मणः तत् अरण्यम् आगतवान् । राक्षसः तं दृष्टवान् । शीघ्रं तस्य स्कन्धम् आरुह्य उपविश्य सः उक्तवान् - ''भोः ब्राह्मण ! अग्रे गच्छतु भवान्'' इति । भीतः ब्राह्मणः अग्रे गतवान् ।

गमनसमये ब्राह्मणः दृष्टवान् यत् राक्षसस्य पादद्वयं कमलम् इव कोमलम् अस्ति इति । तत् दृष्ट्वा विस्मितः सः राक्षसं पृष्टवान् - ''भोः ! भवतः पादद्वयं कथम् एवं कोमलम् अस्ति ?'' इति ।

राक्षसः उक्तवान् - ''मम एकं व्रतम् अस्ति । अहं कदापि आर्द्रपादः भूमिं न स्पृशामि । अतः एव पादद्वयं तथा अस्ति'' इति । अनन्तरं ब्राह्मणः राक्षसात् आत्मनः मोक्षोपायं चिन्तयन् अग्रे अगच्छत् ।

किञ्चित्कालानन्तरम् एकः सरोवरः दृष्टः । तदा राक्षसः - ''भोः ! ब्राह्मण ! अहं स्नानं देवतार्चनं च कृत्वा आगच्छामि । तावत् भवता अत्रैव स्थातव्यम्'' इति उक्त्वा ब्राह्मणस्य स्कन्धतः अवतीर्य सरोवरं गतवान् ।

तदा ब्राह्मणः - 'एषः राक्षसः स्नानं देवतार्चनं च कृत्वा मां निश्चयेन खादिष्यति । अतः इदानीम् एव मया इतः धावनीयम् ।

व्रतभङ्गभयात् राक्षसः माम् अनुसर्तुं न शक्नोति' इति चिन्तयित्वा ततः वेगेन धावितवान् । राक्षसः धावन्तं तं दृष्ट्वा अपि व्रतभङ्गभयात् ग्रहीतुं न अनुधावितवान् । एवं ब्राह्मणस्य प्राणाः रक्षिताः ।

पृच्छकेन सदा भाव्यं पुरुषेण विजानता ।
राक्षसेन्द्रगृहीतोऽपि प्राणान्मुक्तो द्विजः पुरा ॥

१४. क्षतचिह्नाङ्कितः कुलालः

कस्मिंश्चित् ग्रामे कश्चन कुलालः वसति स्म । सः प्रतिदिनं घटान् करोति । कदाचित् कार्यमग्नः कुलालः अकस्मात् पार्श्वे स्थितस्य घटस्य उपरि एव पतितः । सः घटः भग्नः अभवत् । घटस्य एकेन खण्डेन कुलालस्य ललाटे महान् क्षतः जातः । रक्तस्रावः अपि जातः । अनन्तरम् औषधोपयोगेन क्षतः उपशान्तः जातः । परन्तु ललाटे क्षतचिह्नं तथैव स्थितम् ।

कालान्तरे तस्मिन् देशे क्षामः आगतः । ग्रामस्थाः जनाः अन्यं देशं गतवन्तः । कुलालः अपि ग्रामं परित्यज्य अन्यं देशं गतवान् । तत्र कस्यापि महाराजस्य सेवकः अभवत् । महाराजः कुलालस्य ललाटे स्थितं क्षतचिह्नं दृष्ट्वा चिन्तितवान् – 'निश्चयेन एषः कश्चित् वीरपुरुषः स्यात् । युद्धसमये एतस्य ललाटे एवं क्षतः जातः स्यात्' इति ।

अतः सः कुलालस्य सम्माननं कृत्वा, स्वयम् अन्यान् राजपुत्रान् इव एतम् अपि आदरेण अपश्यत् । परन्तु अन्ये राजपुत्राः एतस्य विषये असूयां प्रकटयन्ति स्म ।

कदाचित् अन्यदेशस्य महाराजः एतस्य महाराजस्य उपरि आक्रमणं कृतवान् । तदा महाराजः चिन्तितवान् – 'मम आस्थाने नूतनः वीरपुरुषः यः आगतः अस्ति तं युद्धार्थं प्रेषयिष्यामि । सः शत्रुराजं निश्चयेन जेष्यति' इति ।

अनन्तरं सः एकान्ते कुलालं पृष्टवान् – ''भोः वीरपुरुष ! कस्मिन् युद्धे भवतः एवं क्षतः जातः ?'' इति ।

तदा कुलालः उक्तवान् – ''महाराज ! अहं कश्चन कुलालः, न तु वीरपुरुषः । मम ललाटे स्थितः क्षतः शस्त्रप्रहारेण न जातः, अपि तु घटस्य उपरि पतनेन जातः'' इति ।

तदा राजा उक्तवान् – ''अरे धूर्त ! भवतः ललाटे स्थितेन क्षतचिह्नेन अहं वञ्चितः । अस्तु, तथापि भवन्तं न दण्डयामि । भवान् शीघ्रमेव इतः गच्छतु । यदि भवान् कुलालः इति अन्ये राजपुत्राः जानन्ति तर्हि ते भवन्तम् उपहसिष्यन्ति, मारयिष्यन्ति च । तत्पूर्वमेव इतः गच्छतु'' इति ।

लज्जितः कुलालः ततः धावितवान् ।

१५. दुराशा

पूर्वं कस्मिंश्चित् ग्रामे हरिदत्तः नाम ब्राह्मणः आसीत् । सः कृषिकार्यं करोति स्म । परन्तु दुर्दैववशात् तस्य क्षेत्रे फलसमृद्धिः एव न भवति स्म ।

कदाचित् हरिदत्तः क्षेत्रे कार्यं कुर्वन् आसीत् । तदा सः समीपे विद्यमानस्य वल्मीकस्य उपरि स्थितम् एकं सर्पं दृष्टवान् । सः चिन्तितवान् - 'एषः सर्पः मम क्षेत्रपालः स्यात् । एतत् अजानन्

अहम् एतावत्पर्यन्तम् एतस्य पूजां न कृतवान् । अतः एव मम कृषिकार्यं निष्फलं भवति । इतः परम् अहम् एतं पूजयिष्यामि' इति ।

एवं चिन्तयित्वा हरिदत्तः कुतश्चित् किञ्चित् क्षीरम् आनीय पात्रे स्थापयित्वा वल्मीकस्य समीपम् आगत्य उक्तवान् - ''भोः क्षेत्रपाल ! भवान् अत्रैव अस्ति इति अहम् एतावत्पर्यन्तं न ज्ञातवान् । अतः पूजां न कृतवान् । क्षम्यताम्'' इति । अनन्तरं पात्रं तत्रैव स्थापयित्वा गृहम् आगतवान् ।

अनन्तरदिने तत्र यदा गतं तदा पात्रे एकः दीनारः आसीत् । सः तं दीनारं स्वीकृतवान् । ततः आरभ्य सः एवमेव प्रतिदिनं क्षीरं समर्पितवान्, एकं दीनारं प्रतिदिनं प्राप्तवान् च । एवमेव कानिचन दिनानि अतीतानि ।

कदाचित् हरिदत्तः ग्रामान्तरं गतवान् । गमनसमये सः क्षेत्रपालस्य पूजां कर्तुं स्वपुत्रं सूचयित्वा गतवान् । सः पुत्रः वल्मीकसमीपं गत्वा क्षीरं स्थापयित्वा आगतवान् । अनन्तरदिने दीनारं प्राप्तवान् । दीनारं दृष्ट्वा सः चिन्तितवान् - 'निश्चयेन एतस्मिन् वल्मीके प्रभूतं दीनाराः सन्ति । अतः एतं सर्पं मारयित्वा सर्वान् दीनारान् स्वीकरोमि' इति । अनन्तरदिने क्षीरदानसमये सः दण्डेन सर्पं ताडितवान् । सर्पः रोषेण तं दष्टवान् । तेन सः पुत्रः मृतः ।

एवं सः मूर्खपुत्रः दुराशया स्वयमेव नष्टः ।

१६. कपोतस्य अतिथिसत्कारः

कश्चन व्याधः आसीत् । सः अतीवः दुष्टः निष्करुणः च । एकदा सः वनं गतवान् । तत्र जालं प्रसारितवान् । एका कपोता जाले पतिता । तां कपोतां पञ्जरे स्थापयित्वा व्याधः अग्रे गतवान् ।

तदा अकस्मात् महती वृष्टिः आरब्धा । महता वेगेन वायुः वाति स्म अपि । भीतः व्याधः आश्रयम् अन्विष्यन् कस्यचित् महावृक्षस्य अधः आगतवान् । सः उक्तवान् - ''भोः, अत्र यः वासं करोति तम् अहं शरणं गतः अस्मि । सः मां रक्षतु'' इति ।

तस्मिन् वृक्षे कश्चन कपोतः वासं करोति स्म । सः एव व्याधेन गृहीतायाः कपोतायाः पतिः आसीत् ।

कपोतः व्याधस्य पञ्जरे स्थितां पत्नीं दृष्टवान् । तदा सा कपोता पतिम् उक्तवती - ''भोः कान्त ! इदानीम् एषः व्याधः शीतार्तः, क्षुधार्तः च सन् अस्माकं गृहम् आगतवान् अस्ति । एतस्य सत्कारः भवता करणीयः । व्याधः मां बद्धवान् इति भवान् मा चिन्तयतु । एतस्य सत्कारं करोतु'' इति ।

पत्न्याः वचनं कपोतः अङ्गीकृतवान् । सः अङ्गारकम् आनीय शुष्कैः पर्णैः अग्निं ज्वालितवान् । व्याधम् उक्तवान् - ''भोः व्याध ! एतेन अग्निना भवान् स्वस्य शीतबाधां दूरीकरोतु'' इति ।

अनन्तरं कपोतः चिन्तितवान् - 'एषः व्याधः मम अतिथिः अस्ति । एषः इदानीं बुभुक्षितः अस्ति । एतस्मै दातुं कोऽपि आहारः अत्र नास्ति । किं करोमि ?' इति ।

एवं चिन्तयित्वा सः व्याधम् उक्तवान् - ''भोः अतिथिमहाशय ! भवान् एकं क्षणं तिष्ठतु । इदानीं भवते आहारं सिद्धं कृत्वा ददामि'' इति । अनन्तरं कपोतः स्वयम् अग्निं प्रविष्टवान् ।

'मम मांसं व्याधः खादतु' इति तस्य आशयः आसीत् ।

कपोतस्य त्यागं दृष्टवतः व्याधस्य लज्जा जाता । सः करुणया कपोतां पञ्जरतः बन्धविमुक्तां कृतवान् । तदा पतिविरहपीडिता कपोता अपि अग्निं प्रविष्टवती ।

एतत् दृष्टवतः व्याधस्य मनसः परिवर्तनं जातम् । 'एतादृशाः पक्षिणः अपि धर्माचरणं कुर्वन्ति । अहं तु अन्येषां प्राणिनां प्राणानाम् अपहरणं कुर्वन् अधर्मेण जीवामि । एतत् अनुचितम्' इति चिन्तयित्वा सः व्याधः अपि अग्निं प्रविश्य प्राणार्पणं कृतवान् ।

अनन्तरं ते त्रयः अपि स्वर्गं गतवन्तः ।

१७. चत्वारः मुर्खपण्डिताः

कस्मिंश्चित् ग्रामे चत्वारः स्नेहिताः आसन् । तेषु त्रयः शास्त्रेषु पारङ्गताः । परन्तु बुद्धिरहिताः । अपरः तु शास्त्रं किमपि न जानाति । परन्तु बुद्धिमान् ।

एकदा ते चिन्तितवन्तः – 'देशान्तरं गत्वा महाराजस्य पुरतः अस्माकं पाण्डित्यं प्रदर्श्य धनसम्पादनं करणीयम्' इति । एवं चिन्तयित्वा ते देशान्तरं प्रस्थिताः ।

मार्गे ते एकस्य मृतसिंहस्य अस्थीनि दृष्टवन्तः । तदा प्रथमः

उक्तवान् - ''भोः सुहृदः ! अस्माकं विद्यायाः परीक्षां कर्तुम् एषः उत्तमः अवसरः । वयम् एतं सिंहं जीवसहितं करवाम'' इति ।

अनन्तरं सः सिंहस्य अस्थीनि योग्येन क्रमेण योजितवान् । द्वितीयः तत्र रक्तमांसचर्मादिकं संयोजितवान् । तृतीयः यदा तस्य जीवदानं कर्तुम् उद्युक्तः तदा शास्त्रज्ञानरहितः चतुर्थः उक्तवान् - ''भोः, यदि एषः सिंहः जीवितः भवेत्, तर्हि अस्मान् मारयेत् । अतः तस्य जीवदानं न करणीयम्'' इति ।

तदा तृतीयः उक्तवान् - ''मूर्ख ! मया अपि मम विद्यायाः परीक्षा करणीया अस्ति । अतः अहं जीवदानं करोमि एव'' इति ।

तदा चतुर्थः - ''तर्हि भवान् एकं क्षणं तिष्ठतु । अहं वृक्षम् आरोहामि'' इति उक्त्वा एकं वृक्षम् आरूढवान् । तृतीयः सिंहस्य जीवदानं कृतवान् । तदा सजीवतां गतः सः सिंहः त्रीन् अपि पण्डितान् मारितवान्, तृप्त्या ततः निर्गतः च । अनन्तरं चतुर्थः वृक्षतः अवतीर्य ग्रामम् आगतवान् ।

अतः पण्डिताः वदन्ति - 'विद्यायाः अपेक्षया बुद्धिः एव गरीयसी' इति ।

१८. कीलोत्पाटी वानरः

कस्मिंश्चित् नगरे कश्चन धनिकः आसीत् । सः एकं देवालयं निर्मापयितुम् इष्टवान् । तदर्थं बहूनि वस्तूनि अपेक्षितानि आसन् । कर्मकराः तेषां सङ्ग्रहणम् आरब्धवन्तः ।

केचन कर्मकराः काष्ठखण्डान् आनेतुम् अरण्यं गतवन्तः । ते तत्र एकं महावृक्षं छित्त्वा पातितवन्तः । क्रकचेन तस्य विदारणम् आरब्धवन्तः । यदा अर्धभागस्य विदारणं समाप्तं तदा तेषां बुभुक्षा जाता । अतः ते अर्धविदीर्णस्य काष्ठखण्डस्य मध्ये एकं कीलकं संयोज्य आहारार्थं नगरं गतवन्तः ।

तदा एकः वानरः तत्र आगतः । अर्धविदीर्णं काष्ठखण्डं दृष्टवतः तस्य कुतूहलं जातम् । सः तत् कीलकम् उत्पाटयितुं प्रयत्नम् अकरोत् । परन्तु न शक्तम् । ततः सः तस्य काष्ठखण्डस्य मध्यभागे सम्यक् उपविष्टवान् । तन्मध्ये योजितं कीलकं महता प्रयत्नेन उत्पाटितवान् च । कीलकं तु बहिः आगतम् । परन्तु तन्मध्ये लग्नं वानरस्य पादद्वयम् अपि भग्नम् । वेदनया पीडितः सः वानरः तत्रैव मृतः ।

अकर्तव्येषु व्यापारं यो नरः कर्तुमिच्छति ।
अवश्यं विपदं याति कीलोत्पाटीव वानरः ।।

१९. यद्भविष्यो विनश्यति

कस्मिंश्चित् जलाशये अनागतविधाता, प्रत्युत्पन्नमतिः, यद्भविष्यः चेति त्रयः मीनाः आसन् । ते स्वीयैः अनुचरैः सह सुखेन जीवन्ति स्म ।

एकदा केचन धीवराः तस्य जलाशयस्य समीपम् आगतवन्तः । तदा सायङ्कालसमयः । जलाशयं दृष्ट्वा धीवराः परस्परम् उक्तवन्तः - ''एतस्मिन् जलाशये बहवः मीनाः तु सन्ति । परन्तु इदानीं तेषां ग्रहणं कष्टकरम् । अतः वयं श्वः प्रातःकाले अत्र आगत्य एतान् ग्रहीष्यामः'' इति । अनन्तरं ते ततः गतवन्तः ।

धीवराणां सम्भाषणं श्रुत्वा अनागतविधाता उक्तवान् - ''भोः ! धीवराणां वचनं श्रुतं किल ? ते श्वः आगमिष्यन्ति । अत्र स्थास्यामः चेत् अवश्यम् अस्माकं मरणं भविष्यति । अतः वयम् इदानीम् एव अन्यं जलाशयं गच्छाम'' इति ।

प्रत्युत्पन्नमतिः उक्तवान् - ''सत्यं, शीघ्रमेव अन्यत्र गच्छाम'' इति ।

परन्तु यद्भविष्यः एतत् श्रुत्वा उच्चैः हसितवान् । उक्तवान् च - ''भोः ! भवतोः बुद्धिः एव नास्ति । कस्यचित् धीवरस्य वचनेन एतम् उत्तमं जलाशयं परित्यज्य किमर्थं गच्छेम ? एतत् न उचितम् । अस्माकम् आयुः अस्ति चेत् अत्र तिष्ठेम चेदपि जीवेम एव । आयुः नास्ति चेत् अन्यत्र गच्छेम चेदपि अस्माकं मरणं भविष्यति एव । अहं तु कुत्रापि न आगच्छामि । भवन्तः

यथा इच्छा तथा कुर्वन्तु'' इति ।

तदनन्तरम् अनागतविधाता प्रत्युत्पन्नमतिः च रात्रौ एव ततः अन्यं जलाशयं गतवन्तौ ।

प्रातःकाले ते धीवराः तत्र आगतवन्तः । तस्मिन् जलाशये स्थितान् सर्वान् अपि मीनान् ते गृहीतवन्तः । यद्भविष्यः अपि तैः गृहीतः, मारितः च ।

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा ।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ।।

२०. लुब्धः शृगालः

कश्चन व्याधः आसीत् । सः एकदा मृगयार्थं वनं गतवान् । बहुकालानन्तरं सः एकं वराहं दृष्टवान् । तं लक्ष्यीकृत्य सः बाणप्रयोगं कृतवान् । वराहस्य शरीरे महान् व्रणः जातः । व्रणितः वराहः कोपेन व्याधस्य उपरि आक्रमणं कृतवान् । स्वीयाभिः तीक्ष्णाभिः दंष्ट्राभिः तस्य शरीरं विदीर्णवान् । तेन व्याधः मृतः । बाणप्रहारवेदनया वराहः अपि मृतः ।

तस्मिन् एव वने कश्चन शृगालः आसीत् । सः अतीव लुब्धः । सः शृगालः आहारान्वेषणं कुर्वन् तत्र एव आगतवान् । व्याधस्य वराहस्य च मृतं शरीरं सः दृष्टवान् । तत् दृष्ट्वा सः चिन्तितवान् - 'अद्य मम दैवम् अनुकूलम् अस्ति । यथेष्टम् आहारः विनायासं लब्धः । एषः आहारः बहुदिनानां कृते पर्याप्तः भविष्यति । अतः प्रतिदिनम् अपि किञ्चिदेव खादामि' इति ।

अनन्तरं सः व्याधस्य शरीरं परिशीलितवान् । तस्य शरीरस्य पार्श्वे चापः पतितः आसीत् । चापे चर्मनिर्मिता रज्जुः बद्धा आसीत् । तत् दृष्ट्वा शृगालः 'अद्य एतां चर्मणः रज्जुं खादामि । अन्यत् सर्वं पश्चात् खादामि' इति चिन्तितवान् । चापस्य एकां कोटिं मुखे स्थापयित्वा सः दन्तैः रज्जुं जग्धवान् । परन्तु यदा रज्जुः भग्ना तदा चापस्य कोटिः शृगालस्य मस्तकं विदीर्य बहिः आगता । शृगालः तया वेदनया तत्क्षणे एव मृतः अभवत् ।

२१. मूर्खमण्डलम्

कस्मिंश्चित् अरण्ये कश्चन महावृक्षः आसीत् । तत्र सिन्धुकः नाम पक्षी वासं करोति स्म । तस्य पुरीषे सुवर्णम् उत्पद्यते स्म ।

एकदा कश्चन व्याधः तत् अरण्यं गतवान् । तदा पक्षिणा तस्य पुरतः एव पुरीषोत्सर्जनं कृतम् । पुरीषे स्थितं सुवर्णं दृष्टवतः व्याधस्य आश्चर्यं जातम् । सः चिन्तितवान् - 'जन्मनि एतावत्पर्यन्तम् अहम् एतादृशं विचित्रपक्षिणं न दृष्टवान् । अहो, एतस्य पुरीषे सुवर्णम् उत्पद्यते !' इति ।

सः जालं प्रसार्य तं पक्षिणं गृहीतवान् । पञ्जरे स्थापितवान् च । पुनः 'एतेन पक्षिणा अहं किं करोमि ? एतादृशः विचित्रः पक्षी महाराजस्य समीपे एव भवेत् । अतः महाराजाय एव एतं

पक्षिणम् उपायनीकरोमि' इति चिन्तयित्वा सः नगरं गतवान् । महाराजं दृष्ट्वा उक्तवान् च – ''महाराज ! एषः कश्चन विचित्रः पक्षी । एतस्य पुरीषे सुवर्णम् उत्पद्यते'' इति ।

महाराजः अतीव सन्तुष्टः । सः सेवकान् उक्तवान् – ''भोः सेवकाः । एतं पक्षिणं जागरूकतया रक्षन्तु । व्याधाय प्रभूतं पारितोषिकं यच्छन्तु'' इति ।

तदा मन्त्री महाराजम् उक्तवान् – ''महाराज ! एषः व्याधः असत्यं वदति । कदाचित् वा पक्षिपुरीषे सुवर्णम् उत्पद्यते किम् ? एतत् असत्यमेव । व्याधस्य वचने विश्वासः न करणीयः । एतं पक्षिणं पञ्जरतः विमोचयन्तु'' इति ।

सेवकाः मन्त्रिवचनानुसारं पञ्जरद्वारम् उद्घाटितवन्तः । पक्षी पञ्जरतः उड्डीय राजभवनस्य उन्नते द्वारे उपविष्टवान् । तत्र सः पुरीषोत्सर्जनं कृतवान् । तत् पुरीषं सुवर्णमयम् आसीत् । राजादयः आश्चर्येण तत् दृष्टवन्तः ।

तदा पक्षी चिन्तयति – 'मूर्खः अहं व्याधस्य जाले पतितः । मूर्खव्याधः मां महाराजाय दत्तवान् । सः मूर्खः महाराजः मूर्खस्य मन्त्रिणः वचनानुसारं मां बन्धविमुक्तं कृतवान् । एवं समग्रं जगत् एव मूर्खमण्डलम्' इति ।

पूर्वं तावदहं मूर्खः द्वितीयः पाशबन्धकः ।
ततो राजा च मन्त्री च सर्वं हि मूर्खमण्डलम् ।।

२२. दुराशापीडितः नापितः

पूर्वं पाटलीपुत्रनगरे मणिभद्रः नाम श्रेष्ठी आसीत् । कालान्तरे विधिवशात् सः अतीव निर्धनः जातः । दारिद्र्येण अत्यन्तं खिन्नः सः 'प्राणत्यागं करोमि' इति निश्चितवान् ।

परन्तु तस्मिन् दिने सः एकं स्वप्नं दृष्टवान् । स्वप्ने कश्चन क्षपणकः तेन दृष्टः । सः क्षपणकः उक्तवान् – ''भोः मणिभद्र ! अहं भवतः पूर्वजैः सम्पादितः निधिः । मम नाम पद्मनिधिः इति । अहं भवतः गृहम् आगन्तुम् इच्छामि । प्रातः क्षपणकरूपेण तत्र आगमिष्यामि । भवान् दण्डेन मम शिरसि ताडयतु । अहं तदा कनकमयः भूत्वा अक्षय्यः भविष्यामि'' इति । अनन्तरं मणिभद्रः जागरितः ।

अनन्तरदिने प्रातः स्वप्नोक्तरीत्या एकः क्षपणकः गृहम् आगतवान् । मणिभद्रः अपि दण्डेन तं क्षपणकं शिरसि ताडितवान् । क्षपणकः कनकमयः भूत्वा भूमौ पतितवान् । मणिभद्रः सर्वं कनकं गृहस्य अन्तः नीतवान् ।

अत्रान्तरे कश्चित् नापितः तत्र आगतवान् । सः प्रवृत्तं सर्वमपि दृष्टवान् । एतद् ज्ञात्वा मणिभद्रः नापितं गृहस्य अन्तः आहूय – ''मित्र ! अत्र इदानीं भवता यद् दृष्टं तद् अन्यत्र कुत्रापि न वक्तव्यम्'' इति उक्तवान् । तस्मै उपायनरूपेण किञ्चित् धनमपि दत्तवान् सः ।

नापितः स्वगृहं गत्वा चिन्तितवान् – 'क्षपणकान् दण्डेन ताडयामः चेत् तेषां कनकमयत्वं सेत्स्यति इति तु निश्चितम् । अतः अहमपि तथैव करोमि' इति ।

अनन्तरं प्रातःकाले नापितः क्षपणकविहारं गतवान् । तत्रत्यान् सर्वान् अपि क्षपणकान् – "भवन्तः अद्य मध्याह्ने भोजनार्थं मम गृहम् आगच्छन्तु" इति प्रार्थितवान् ।

क्षपणकाः अङ्गीकृतवन्तः । मध्याह्ने गृहम् आगतवन्तः अपि । नापितः द्वारं पिधाय दण्डेन तेषां शिरसि ताडनम् आरब्धवान् । क्षपणकाः भीत्या कोलाहलं कृतवन्तः । कोलाहलं श्रुत्वा राजभटाः आगतवन्तः । ते नापितं न्यायालयं नीतवन्तः ।

तत्र न्यायाधिकारी नापितं पृष्टवान् – "किमर्थं भवान् क्षपणकान् ताडितवान् ?" इति ।

नापितः मणिभद्रस्य गृहे दृष्टं सर्वमपि उक्तवान् । न्यायाधिकारी मणिभद्रम् आहूय तस्य मुखात् सर्वं वृत्तान्तं ज्ञातवान् । अनन्तरं दुराशापीडितं तं नापितं शूलम् आरोपितवान् च ।

(९९)

२३. मन्दः मन्थरकः

कस्मिंश्चित् ग्रामे मन्थरकः नाम तन्तुवायः आसीत् । सः प्रतिदिनं वस्त्रं वयति स्म । कदाचित् तस्य वयनयन्त्रस्य काष्ठनिर्मितः दण्डः भग्नः । नूतनदण्डम् आनेतुं मन्थरकः परशुं गृहीत्वा अरण्यं गतवान् । तत्र सः एकम् उत्तमं वृक्षं दृष्टवान् । तं कर्तयितुं सः परशुप्रयोगं कृतवान् ।

तस्मिन् वृक्षे काचित् देवता वसति स्म । सा मन्थरकम् उक्तवती – "भोः ! एषः वृक्षः मम आश्रयस्थानम् अस्ति । अतः भवान् एतं मा कर्तयतु । अहं भवते एकं वरं ददामि । भवान् यद् इच्छति तद् याचतु" इति ।

मन्थरकः 'अहं चिन्तयित्वा वदामि' इति उक्तवान् । अनन्तरं सः मित्रस्य नापितस्य गृहं गतवान् । तं पृष्टवान् – "भोः मित्र ! देवता वरं दातुं सज्जा अस्ति । कं वरं याचानि ?" इति ।

नापितः उक्तवान् – "भवान् राज्यं याचतु । तेन महाराजत्वं प्राप्यते । अहं भवतः मन्त्री भविष्यामि" इति ।

"अस्तु" इति उक्त्वा मन्थरकः गृहम् आगतवान् । पत्नीं पृष्टवान् – "प्रिये ! देवता वरं ददाति । नापितः वदति – राज्यं याचतु इति । किं याचानि ?" इति ।

सा उक्तवती – "नापितः मूर्खः । सः किमपि न जानाति । राज्यस्य निर्वहणे बहु कष्टं भवति । अतः राज्यं मास्तु । इदानीं

भवान् प्रतिदिनम् एकं वस्त्रं वयति किल । तेन अस्माकं दैनन्दिनव्ययार्थम् अपेक्षितं धनं लभ्यते । भवान् देवताम् अन्यत् बाहुद्वयं, द्वितीयं शिरः च याचतु । तदा भवान् प्रतिदिनं वस्त्रद्वयं

कर्तुं शक्नोति । एकस्य वस्त्रस्य धनं दैनन्दिनोपयोगार्थं भवति । द्वितीयस्य धनं सङ्ग्रहीतुं शक्यते । तदा वयं सुखेन जीवितुं शक्नुयाम'' इति ।

मन्थरकः एतत् अङ्गीकृतवान् । सः वनं गत्वा देवतां याचितवान् – ''भगवति ! मह्यम् अन्यत् बाहुद्वयं, द्वितीयं शिरः च ददातु'' इति ।

देवता ''तथास्तु'' इति उक्तवती । तत्क्षणमेव मन्थरकस्य अन्यत् बाहुद्वयं, द्वितीयं शिरः च उत्पन्नम् । सः सन्तोषेण ग्रामम् आगतवान् । परन्तु जनाः विचित्राकारं तं दृष्ट्वा 'एषः राक्षसः' इति मत्वा दण्डेन ताडयित्वा तं मारितवन्तः ।

२४. उपकारी चोरः

कस्मिंश्चित् नगरे कश्चन चोरः आसीत् । सः चौर्ये अतीव निपुणः ।

एकदा चत्वारः पण्डिताः तद् नगरम् आगतवन्तः । पण्डितानां सविधे अधिकं धनम् आसीत् । तद् धनम् अपहरणीयम् इति चोरः चिन्तितवान् । अतः सः तेषां स्नेहं सम्पादितवान् । किन्तु पण्डिताः सर्वं धनं दत्त्वा बहुमूल्यानि रत्नानि क्रीतवन्तः । तानि रत्नानि कोषे स्थापयित्वा ततः ते प्रस्थितवन्तः ।

तदा चोरः चिन्तितवान् – 'अहम् अपि एतैः सह गच्छामि । मार्गे कुत्रापि एतेषां वधं कृत्वा रत्नानि अपहरिष्यामि' इति । अतः सः तान् उक्तवान् – ''भोः पण्डिताः ! अहं भवद्भिः विना जीवितुं न शक्नोमि । अतः भवद्भिः सह एव आगच्छामि, कृपया अनुमतिं यच्छन्तु'' इति । पण्डिताः एतत् अङ्गीकृतवन्तः । अनन्तरं ते सर्वे ततः प्रस्थितवन्तः ।

मार्गमध्ये अरण्यम् आसीत् । तत्र किराताः वासं कुर्वन्ति । किरातवसतौ कश्चन काकः आसीत् । सः विचित्रशक्तिमान् । मार्गे ये गच्छन्ति तेषां सविधे धनम् अस्ति चेत् सः जानाति । किरातान् सूचयति च । इदानीं पण्डितान् दृष्ट्वा काकः स्वभाषया किरातान् उक्तवान् – ''रे किराताः ! धावन्तु, एतेषां पण्डितानां सविधे धनम् अस्ति । तद् भवन्तः वशीकुर्वन्तु'' इति ।

तदा पण्डिताः रत्नरक्षणार्थम् एकम् उपायं चिन्तितवन्तः । ते रत्नानि गीर्णवन्तः । किराताः काकस्य वचनं श्रुत्वा पण्डितान् बद्धवन्तः । तेषां वस्त्राणि निष्कास्य सर्वत्र अन्विष्टवन्तः । परन्तु धनं न लब्धम् । तदा किराताः उक्तवन्तः – ''भोः ! धनम् अस्ति एव । तत् यच्छन्तु । नो चेत् सर्वेषां वधं कृत्वा चर्म विदार्य प्रत्यङ्गम् अन्वेषणं कुर्मः'' इति ।

किरातानां वचनं श्रुत्वा चोरः चिन्तितवान् – 'यदा एते पण्डितानां वधं कृत्वा शरीरे अन्वेषणं कुर्वन्ति तदा रत्नानि लभ्यन्ते । तदा मम शरीरे अपि रत्नं स्यात् इति ममापि वधं कुर्वन्ति एव । अतः अहं प्रथमं मम वधं कर्तुं वदामि । मम शरीरे तु रत्नं नास्ति । तद् ज्ञात्वा किराताः पण्डितान् मुञ्चन्ति । मम प्राणार्पणेन पण्डितानां रक्षणं भवतु' इति ।

अनन्तरं सः उक्तवान् – ''भोः किराताः ! अस्माकं सविधे धनं किमपि नास्ति । तथापि संशयः अस्ति चेत् मम वधं कृत्वा पश्यन्तु'' इति । किराताः चोरस्य वधं कृतवन्तः । शरीरे सर्वत्र अन्वेषणं कृतवन्तः । परन्तु कुत्रापि धनं न लब्धम् ।

तदा ते काकस्य वचनम् एव असत्यं स्यात् इति चिन्तयित्वा क्षमायाचनं कृत्वा तान् पण्डितान् सगौरवं ततः प्रेषितवन्तः ।

२५. क्रथनकस्य कथा

कस्मिंश्चित् वने मदोत्कटः नाम सिंहः वसति स्म । गजः, शृगालः, काकः च तस्य अनुचराः आसन् ।

एकदा क्रथनकः नाम उष्ट्रः तत् वनम् आगतवान् । तं दृष्ट्वा सिंहस्य अनुचराः उक्तवन्तः – ''प्रभो ! भवान् तम् उष्ट्रं मारयतु । तस्य मांसं खादाम'' इति ।

सिंहः उक्तवान् – ''तथा न करणीयम् । सः अस्माकं अतिथिः'' इति । सः उष्ट्रं स्व-समीपम् आहूय पृष्टवान् – ''भोः ! भवान् कुतः आगतवान् ?'' इति । क्रथनकः उक्तवान् – ''अहं समीपग्रामतः आगतवान्'' इति । ''भवान् पुनः ग्रामं मा गच्छतु । अत्र एव निर्भयं वसतु'' इति सिंहः तम् उक्तवान् । क्रथनकः तदनुसारं वने निर्भयं वासम् आरब्धवान् ।

एकदा सिंहस्य अनारोग्यम् अभवत् । निःशक्त्या सः चलितुम् अपि असमर्थः । अतः सः अनुचरान् उक्तवान् – ''भोः ! भवन्तः कमपि मृगम् आनयन्तु । तं मारयित्वा तस्य मांसं खादाम'' इति । अनुचराः बहुधा अन्वेषणं कृतवन्तः । परन्तु कोऽपि मृगः तैः न लब्धः । ते चिन्तितवन्तः – 'कथञ्चित् एषः उष्ट्रः मारणीयः' इति । अनन्तरं शृगालः सिंहस्य समीपम् आगत्य उक्तवान् – ''प्रभो ! अन्यः मृगः न लब्धः । क्रथनकम् एव मारयाम किम् ?'' इति ।

तत् श्रुत्वा सिंहः क्रोधेन उक्तवान् – ''मूर्ख ! पुनः भवान् एवं मा वदतु । अहं क्रथनकाय अभयं दत्तवान् अस्मि । सः न मारणीयः'' इति ।

''अभयं दत्त्वा पुनः तस्य मारणं दोषाय एव । परन्तु सः एव यदि स्वामिकार्यार्थम् आत्मार्पणं कर्तुम् इच्छेत् तर्हि तस्य मारणे दोषः नास्ति एव'' इति शृगालः उक्तवान् ।

''तर्हि यथा रोचते तथा करोतु भवान्'' इति उक्तवान् सिंहः ।

तदनन्तरं ते सर्वे अनुचराः क्रथनकेन सह पुनः सिंहस्य समीपम् आगतवन्तः । काकः सिंहम् उक्तवान् – ''प्रभो ! आहारार्थं कोऽपि मृगः न लब्धः । अतः भवान् मां खादित्वा स्वप्राणान् रक्षतु । तेन मम अपि स्वर्गप्राप्तिः भविष्यति'' इति । तदा शृगालः – ''भोः काक ! भवतः शरीरे अत्यल्पं मांसम् अस्ति । तत् महाराजाय पर्याप्तं न भवति'' इति उक्त्वा सिंहम् उक्तवान् – ''प्रभो ! भवान् माम् एव खादतु'' इति । तदा गजः उक्तवान् – ''भवतः शरीरम् अपि अल्पम् एव । तदपि महाराजाय पर्याप्तं न भवति । अतः महाराजः माम् एव खादतु । अहं स्वामिकार्यार्थं प्राणार्पणं करोमि । मम स्वर्गप्राप्तिः भवतु'' इति ।

एतत् सर्वं श्रुत्वा क्रथनकः – 'सर्वे अपि 'मां खादतु, मां खादतु' इति सिंहं विज्ञापितवन्तः । परन्तु सिंहः कमपि न खादितवान् । अतः अहमपि तथा विज्ञापयामि । सिंहः माम् अपि न खादति' इति चिन्तयित्वा उक्तवान् – ''प्रभो ! गजस्य

मांसं खादितुं बहु कष्टं भवति । तत् जीर्णम् अपि न भवति । अतः भवान् मां खादतु" इति ।

क्रथनकस्य वाक्यसमाप्तितः पूर्वमेव ते अनुचराः तस्य उपरि आक्रमणं कृतवन्तः । तं मारयित्वा सन्तोषेण तदीयं मांसं खादितवन्तः ।

२६. मूर्खः अनुचरः

कश्चन महाराजः आसीत् । तस्य प्रासादे कश्चन वानरः आसीत् । सः वानरः महाराजस्य अतीव विश्वासपात्रम् अनुचरः । अतः राजभवने सर्वत्र अपि तस्य प्रवेशः अनुमतः आसीत् ।

एकदा महाराजः अन्तःपुरे निद्रां कुर्वन् आसीत् । तदा वानरः तत्र आगतवान् । सः निद्राङ्गतस्य महाराजस्य समीपं गत्वा व्यजनेन वीजनम् आरब्धवान् ।

अत्रान्तरे महाराजस्य वक्षस्स्थले एका मक्षिका उपविष्टा । वानरः व्यजनेन तां दूरीकर्तुं पुनः पुनः प्रयत्नं कृतवान् । तथापि मक्षिका ततः दूरं न गता । तदा सः स्वभावचपलः मूर्खः वानरः कुपितः सन् तीक्ष्णं खड्गं गृहीत्वा तस्याः उपरि प्रहारं कृतवान् । मक्षिका उड्डीय ततः गता । खड्गप्रहारेण महाराजस्य वक्षस्स्थलं विदीर्णं जातम् । तेन महाराजः मृतः अभवत् ।